Postal Regd.No. GAMC- 1553/2019-2021

ISSN 2454-6313

संस्कृत-

# साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १५ अङ्क : १७४
नवेम्बर - २०२०

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### जीवनमेव सन्देशः

वयं गङ्गायाः पूजनं गङ्गाजलेन कुर्मः । अग्नेः पूजनम् अग्निना कुर्मः । तथैव जीवनस्य उपासना अपि जीवनेन एव कर्तुं शक्यते । जीवनस्य अर्थः शब्दकोशेषु न, अपि तु जीवने एव उपलभ्यते । अतः एव गान्धिवर्यः उक्तवान् – 'मम जीवनमेव मम सन्देशः ।' प्रत्येकं दिनं तथा गुणवत्तमं भवेत् यथा रात्रौ रात्रौ किमपि उत्तमं नाटकं समाप्तं स्यात्। इतः प्राप्तः परितोषः एव मनुष्यस्य चारित्र्यं सूचयति। चारित्र्यवान् मनुष्यः कीदृशः भवति ? यस्य दिनं स्वस्मै परस्मै च गुणवत्तापरिपूर्णं स्यात् सः चारित्र्यवान्। परन्तु सर्वेषां मनुष्याणां जीवने एवं न भवति। तत् दुःखकरं नास्ति। किन्तु 'मम जीवने एव न भवति' इति दुःखं न गणयन् मनुष्यः मूढः अस्ति।

समाजे अनेके जनाः नितरां कार्यव्यापृताः दृश्यन्ते । तेषां जीवनं नानाकर्मभिः परिपूर्णं भवति । 'कर्म हि जीवनम्' इति तेषां ध्येयसूत्रं भवति। अत्रापि सन्तर्पकं कर्म जीवनं सुगन्धमयं करोति। प्रत्युत, क्लेशबहुलं कर्म जीवनं मलीमसं करोति। दरिद्राणां कर्ममयं जीवनं वयं विज्ञातुं शक्नुमः। ते अरुचिकरं कर्म कर्तुं विवशाः अपि दृश्यन्ते। परन्तु केचन धनिकाः उद्वेगकरं कर्म त्यक्तुं न शक्नुवन्ति। मया बहवः प्राध्यापकाः दृष्टाः। ते निवृत्तेः अनन्तरं खलु आपणान् उद्घाट्य उपविशन्ति। प्राध्यापकाः दरिद्राः न सन्ति, परं तेषां चित्तं निश्चयेन दरिद्रम् अस्ति। कृपणस्य जीवनं धनप्रधानं भवति, गौरवप्रधानं न। तादृशाः जनाः जीवनं त्यक्तुं शक्नुवन्ति, न तु धनम्। कृपणता अपि व्यसनम् अस्ति। तत् शनैः शनैः त्यक्तव्यम्।

जीवनस्य नाशकम् अन्यत् तत्त्वम् अस्ति – लक्ष्यहीना जीवनशैली। वस्तुतः जीवनस्य किमपि लक्ष्यं भवितुं नार्हति। परिपूर्णम् अस्तित्वम् एव जीवनस्य उद्देश्यम् अस्ति। यथा हि पुष्पस्य जीवनमेव पुष्पस्य लक्ष्यम् अस्ति। 'तव लक्ष्यं किम् ?' इति वयं पुष्पं न पृच्छामः। यदि वयं जीवनस्य लक्ष्यं निश्चितं करिष्यामः तर्हि 'लक्ष्यस्य प्राप्तेः अनन्तरं किम् ?' इति प्रश्नः उद्भविष्यति। यथा हि कस्यचित् कवेः लक्ष्यम् अस्ति – महाकाव्यस्य रचना। चिन्तयन्तु, तस्य तत् लक्ष्यं जीवनस्य मध्ये एव सम्पन्नम् इति। अथ अवशिष्टे जीवने कविः किं करिष्यति ? आत्मघातं करिष्यति ? अथवा द्वितीयं लक्ष्यं प्रति धाविष्यति ? सः एवं लक्ष्यपरम्पराम् एव रचयिष्यति ? न हि। जीवनस्य लक्ष्यं न भवति। केवलं रचनात्मकं जीवनं भवति। अनेन प्रकारेण मनुष्यः जीवनस्य सन्ध्याकालम् अपि रमणीयं कर्तुम् अर्हति।

## जीवनमार्गः



लक्ष्म्याः एकमात्रपुत्रः सत्यवान् । पुत्रं महत्या प्रीत्या लक्ष्मीः पालितवती । पञ्चमे वयसि सत्यवतः पिता दिवङ्गतः । ततः आरभ्य पुत्रे लक्ष्म्याः प्रीतिः अधिका जाता ।

सत्यवान् जन्मना योग्यः एव । किन्तु गच्छता कालेन सः दुष्टः सञ्जातः । वृथा व्ययं कुर्वन् गृहे स्थितं सर्वं धनं नाशितवान् सः । मातुः बोधनम् अपि अपरिगणयन् सः दुष्टं मार्गमेव आश्रितवान् । यदा पुत्रः विंशतिवर्षीयः जातः तदा मातुः मनसि चिन्ता आरब्धा यत् मम पुत्रस्य भविष्यं किं स्यात् इति । एतया चिन्तया एव सा मरणं प्राप्तवती ।

मातुः मरणानन्तरं सत्यवान् अनाथः जातः । तस्य समीपे किमपि न आसीत् । अग्रे जीवनं कथं करणीयम् इति सः चिन्ताग्रस्तः । अतः सः ग्रामे स्थातुम् अनिच्छन् ग्रामान्तरं गतः । किन्तु तत्रापि कोऽपि अस्य साहाय्यं न कृतवान् । ततः निराशः सः तं ग्रामम् अपि त्यक्तवान् । अन्यः कोऽपि जीवनमार्गः न आसीत् तस्य पुरतः । अतः सः अचिन्तयत् यत् मरणं विना इदानीं मम अन्या गतिः नास्ति इति ।

एवं चिन्तयन् सः मार्गे गच्छन् आसीत् । तदा कस्यचित् निम्बवृक्षस्य अधः काचन वृद्धा नाणकानि गणयन्ती तेन दृष्टा । मार्गे गच्छन्तं सत्यवन्तम् आहूय सा वृद्धा पृष्टवती – ''एतस्मिन् घोरे आतपे कुत्र गच्छन् अस्ति भवान् ?'' इति । सत्यवतः मुखात् किमपि वचनं न निर्गतम् । तदीयं मुखं दृष्ट्वा एव सा वृद्धा ज्ञातवती यत् एषः नितरां बुभुक्षितः अस्ति इति । अतः सा स्वसमीपे स्थितं फलद्वयं तस्मै प्रीत्या दत्त्वा अवदत् – ''स्वीकरोतु एतत्'' इति ।

तदा सत्यवान् सङ्कोचेन उक्तवान् – ''मम समीपे धनं नास्ति'' इति ।

''धनविषये अलं चिन्तया । भवान् मम पौत्रः इव अस्ति । एतत् खादतु'' इति सा वृद्धा प्रीत्या उक्तवती ।

सत्यवान् वृद्धया दत्तं फलद्वयं भक्त्या खादित्वा तया दत्तं जलं पीतवान् । ततः वृद्धा सत्यवन्तम् उद्दिश्य – ''पुत्र ! मम वयः अशीतिः वर्षाणि । मम पुत्राः पौत्राः च भगवता नीताः । किन्तु अहं न नीता तेन । अतः अनन्यगतिकतया मया जीवनीयम् एव । एतानि फलानि विक्रीणन्ती अहं जीवामि । मम जीवनोपायः एषः एव'' इति वदन्ती सा फलकण्डोलं शिरसि संस्थाप्य ततः प्रस्थिता ।

वृद्धायाः एतं जीवनोपायं दृष्ट्वा सत्यवान् आश्चर्यान्वितः जातः । ततः प्रस्थितः सः अरण्यमार्गम् आश्रितवान् । अरण्ये गमनसमये कस्माच्चित् वृक्षात् काश्चन शाखाः पतिताः तेन दृष्टाः । सः शिरः उन्नमय्य

अपश्यत्। तत्र दशवर्षीय: कश्चन बाल: वृक्षे उपविश्य शाखा: कर्तयन् तेन दृष्ट:।

तस्य विषये सत्यवति दया उत्पन्ना। स: तं बालं पृष्टवान् – "अस्मिन् अल्पे वयसि किमर्थम् एतादृशं श्रमजनकं कार्यं कुर्वन् अस्ति भवान्? गृहं त्यक्त्वा अरण्यं किमर्थम् आगतं भवता?" इति।

वृक्षस्य उपरिष्टात् एव स बालक: सत्यवन्तम् उक्तवान् – "महोदय! गृहे यदि भवामि तर्हि उदरं कथं पूर्णं भवेत्? एतानि काष्ठानि विक्रीय प्राप्तेन धनेन भोजनं करोमि। मम मातापितरौ न स्त:। श्रमेण एव उदरं पूरणीयं मया" इति।

एतानि वचनानि सत्यवत: मनसि चिन्तातरङ्गान् उदपादयन्। स: तां वृद्धां स्मृतवान्। 'सा वार्धके अपि उदरपूरणार्थं जीवनं करोति। एष: बाल: लघुवयस्क: सन्नपि श्रमं कुर्वन् उदरं पूरयति। एवं स्थिते मया किमर्थम् उदरपूरणार्थं श्रम: न करणीय:? मम अस्या: दैन्यावस्थाया: कारणम् अहमेव। मया एव मम कष्टं निवारणीयम्' इति विचिन्त्य स: स्वग्रामं गत:, ग्रामप्रमुखस्य गृहं गत्वा तस्य पुरत: अतिष्ठत् च।

पर्यङ्के उपविष्ट: ग्रामप्रमुख: एतं दृष्ट्वा पृष्टवान् – "सत्यवन्! क: विशेष:? एतावन्ति दिनानि कुत्र यापितानि भवता? मत्त: किमपि साहाय्यम् इष्यते किम्?" इति।

प्रणामपूर्वकं सत्यवान् तम् अवदत् "महोदय ! भवान् मम पितरं जानात्येव। तेन श्रमेण सम्पादिता समग्रा सम्पत्ति: मया नाशिता। उदरपूरणार्थं किमपि कार्यं यदि मह्यं दीयेत तर्हि अहम् आजीवनं भवत: उपकारं स्मरेयम्। यत्किमपि कार्यं कर्तुम् अहं सिद्ध: एव" इति।

तदा ग्रामप्रमुख: हसन् – "भो:, इच्छामात्रेण कार्यं न लभ्यते। भवति एतादृशं परिवर्तनं द्रष्टुम् इच्छन्ती भवत: माता तयैव चिन्तया मृता। भवान् यदा परिवर्तित: सन् श्रमेण जीवनं कर्तुं सिद्ध: भविष्यति तदा भवते दातव्यम् इति उक्त्वा सा मरणात् पूर्वं किञ्चित् धनम् एकरद्वयपरिमितं क्षेत्रं च मदधीनं कृतवती आसीत्। तिष्ठतु, तत् धनम् आनयामि" इति वदन् गृहस्य अन्त: गत्वा तस्य मात्रा दत्तं धनं, क्षेत्रसम्बन्धिपत्रं च आनीय दत्तवान्।

सत्यवान् तत्सर्वं स्वीकृत्य ग्रामप्रमुखं नमस्कृतवान्। तदा स: ग्रामप्रमुख: – " वत्स! भवत: मातु: विश्वास: आसीत् यत् भवान् कदाचित् वा सज्जन: भवेत् एव इति। तस्या: निरीक्षा अद्य सफला जाता। इत:परं परिश्रमेण योग्येन मार्गेण जीविष्यामि इति यदि भवता प्रतिज्ञा क्रियेत तर्हि मात्रा दत्तम् एतत् धनादिकं सर्वं दशगुणितं भवेत्। परिश्रमेण प्राप्तेन धनेन याप्यमानं जीवनं सुखमयम् आनन्दमयं च भविष्यति" इति उक्तवान्।

सत्यवान् पुन: अपि ग्रामप्रमुखं प्रणम्य मनसि एव तस्मै कृतज्ञतां समर्पितवान्। 'अहो, मम भविष्यविषये एतस्य मनसि कियती श्रद्धा अस्ति!' इति विचिन्त्य स: तदा एव मनसि प्रतिज्ञां कृतवान् यत् परिश्रमेण कार्यं कृत्वा अहं ग्रामीणानाम् आदरपात्रं भविष्यामि, मातु: आशां च पुरयिष्यामि इति।

# हिमालयो नाम नगाधिराजः

डॉ. सुखेश्वरः झा

महाकवेः कालिदासस्य कुमारसम्भवे एकः श्लोकः वर्तते। एतत् शीर्षकम् तस्यैव श्लोकस्य एको भागः। सः श्लोकः अधोलिखितः अस्ति। **अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयोनाम नगाधिराजः।**

**पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मान-दण्डः॥**

इति 'हिम' शब्दस्य अर्थः भवति 'तुषार' इति। 'बर्फ' इति हिन्दी। 'आलयः' - आलीयते यत्र सः। निलयः आश्रयः गृहम् इति तस्य पर्यायाः। हिमस्य आलयः इति षष्ठी-समासेन 'हिमालय'-शब्दः निष्पन्नः भवति।

अन्यत् पदम् वर्तते 'नगाधिराज' इति। न गच्छति इति नगः - पर्वतः। अधिकश्चासौ राजा अधिराजः। अत्र अधिकार्थे 'अधि' शब्दो मन्तव्यः। अधिराज इत्यस्य 'सम्राट्' इति फलितार्थः। नगानाम् अधिराजः, नगाधिराजः भवति। तथा च पर्वतानां सम्राट् इत्यर्थः फलति।

लोकेष्वपि यः अधिक-प्रभावशाली स राजा भवति। राज्ञाम् अपि मध्ये यः सर्वाधिकशक्तिशाली बुद्धिमत्तमो वैभवभृत्तमः स राज्ञाम् अपि राजा, अर्थात् सम्राट् भवति।

गिरीणां मध्ये हिमालयस्य एषैव स्थितिः वर्तते। मृत्तिकायाः अपि राशिः वल्मीकः, उच्चैःस्थानम् (हिन्द्यां टीला इति) वा अभिधीयते। तेषाम् उच्चस्थानानाम् यः शरीरतः, शक्तितश्च महान् भवति सः प्रस्तरशरीरः 'पर्वतः' कथ्यते। सन्ति पर्वता अनेके भारते, संसारे च। तेषां सर्वेषां पर्वतानां मध्ये न कोऽपि हिमालयात् महत्तमः। अतः उच्चतायां, विस्तारे, सुन्दरतायां च हिमालयः सर्वेषु पर्वतेषु उत्कृष्टतमः वरीवर्ति। 'एवरेस्ट' नामकम् अस्य शृङ्गम् २९००० 'फीट' इति, किम्वा ८,८४८ 'मीटर' इति वा उच्चं वर्तते। एतावत् उच्चं शृङ्गम् अन्यस्य कस्यापि पर्वतस्य नोपलभ्यते जगतीतले। तथैव अस्य विस्तारः अतिदूरं प्रसृतः। तत एव 'हिमालय-पर्वत-श्रेणी' इत्युच्यते। फलतो हिमालयो निर्विवादं पर्वतानां श्रेष्ठः सिद्ध्यति।

राजा विपुलं वैभवं यथा धारयति तद्वत् अयं हिमालयः अपि, विविधान् पादपान्, अनेकाः औषधीः, अनेकानि भास्वन्ति रत्नानि च धारयति। राजानम् आश्रित्य यथा अनेके जीवन्ति तथैव हिमालयम् आश्रित्य न केवलं तपस्विनः एव अपितु जनानां जीवानां च कोटयो जीवन्ति। गङ्गादि-सदामृतनीराभिः नदीभिः हिमालयः अस्मान् जीवयति। 'मौनसून' नामकं वर्षववातं अवरुद्ध्य, परावर्त्य च तेन वायुना भूयसीं वर्षां कारयित्वा भारतभुवं सुवर्ण-पुष्पां विधाय अस्मान् भारतीयान् (बांगलादेशीयान् पाकिस्तानीयाँश्च) असौ प्राणधारण-समर्थान् विधत्ते।

उत्तरदिशातः आगच्छन्तं हिमानीभरितम् अतिशीतम् वातम् अवरुद्ध्य शत्रौः इव तस्य वायोः आघातात् अस्मान् अयं हिमालयः तथैव रक्षति यथा कश्चिन्नृपतिः बाह्याक्रमणात् आश्रितान् प्रजाजनान् संरक्षति। स्थलमार्गमाश्रित्य उत्तरतः आक्रान्तॄन् अन्यदेशीयान् जनान् अपि अवरुणद्धि एव। पाकिस्तानतः चीन-देशं यावत् हिमालयाङ्गं निकृत्य कृतमपि मार्गं तुषारसम्पातेन बहुधा सम्प्रपूर्य यातायातावररोधम् एव नोपस्थापयति, अपितु, छेदज-व्रण-विरोपणेन स्वशरीरस्य अक्षत-पूर्वावस्थाम् इव सम्पाद्य भारत-संरक्षणाय भूयोऽप्यात्मानं पूर्ववत् दुर्गी-चिकीर्षति।

अतः न केवलम् उच्चतायां, विस्तार एव वा, अपि तु राज्ञो गुणानां दृष्ट्या अपि अयं वस्तुतो राजा, सम्राट् च सिद्ध्यति। स्थाने खलु कविकुल गुरुणा कालिदासेन अस्माकं राष्ट्रकविना हिमालयः 'नगाधिराज' इति शब्देन संज्ञितः।

## मासवार्ता

**सम्पन्नः संस्कृत-गरबा वेबिनारकार्यक्रमः ।**

संस्कृतभाषायाः प्रचाराय प्रतिवर्षं संस्कृतगरबाकार्यक्रमस्य आयोजनं भवति इति तु सर्वविदितमेव । एतस्मिन् वर्षे कोरोनासमस्यायाः कारणात् गरबायोजनानि न जातानि। किन्तु संस्कृतगरबाकार्यक्रमस्य परम्परा अखण्डिता भवेत् इति विचिन्त्य अमदावाद-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानम्, एकलव्य-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण 'संस्कृत-गरबा' इति विषयमधिकृत्य ऑक्टोबरमासस्य १६ दिनाङ्कात् आरभ्य २० दिनाङ्कं यावत् संस्कृत-गरबाविषयमधिकृत्य वेबिनारकार्यक्रमस्य आयोजनम् अभवत् । कार्यक्रमेऽस्मिन् १६ दिनाङ्के संस्कृत-गरबागायकैः सह संवादः, १७,१९ दिनाङ्कयोः संस्कृतगरबारचयितृभिः अनुवादकैः च सह संवादः, २० दिनाङ्के संस्कृतगरबायोजकैः सह संवादः इत्येतेषु विषयेषु चर्चा सम्पन्ना। कार्यक्रमेऽस्मिन् श्रीभाग्येशः जहा, डॉ. वासुदेवः पाठकः, पं.रामकिशोरः त्रिपाठी, डॉ. अमृतः भोगायता, श्रीधरः व्यासः, डॉ. धर्मेन्द्रः भट्टः, डॉ. मिहिरः उपाध्यायः, श्रीमती भावना रावलः, नन्दिनी रावलः च चर्चाम् अकुर्वन्। कार्यक्रमोऽयं सफलः अत्र उल्लेखनीयं यत् एतेषु दिनेषु 'Virtual गरबा' कार्यक्रमस्यापि आयोजनम् अभवत् । २८ संस्कृतगरबागीतानि संस्कृतरसिकानां कृते 'युट्युब', 'फेसबुक', 'इन्स्टाग्राम' इति विविधैः माध्यमैः प्रसारितानि। कार्यक्रमेऽस्मिन् दशसहस्राधिकाः जनाः भागम् अवहन्।

## सुदृढं मूलं

व्योम शाहः

पुरा कश्चित् समृद्धं नगरम् आसीत् । तत्र एकस्मिन् गृहे काचिद् निवृत्ता शिक्षिका वसति स्म । तस्याः नाम परीक्षिता । तस्याः प्रतिवेषी एकः अधिकारी आसीत् । तस्य नाम हरिः । सः अपि निवृत्तः एव । अपि तस्मै यन्त्राणि बहु रोचन्ते स्म । तयोः गृहस्य पुरतः एकं विशालम् उद्यानम् आसीत् । उभौ स्व-स्व-उद्याने बीजानि आरोपितवन्तौ । क्रमशः तानि बीजानि शनैः शनैः वृद्धिं प्राप्नुवन् । परीक्षिता सस्येभ्यः किञ्चिद् एव जलं ददाति स्म । सा कदापि सस्यानां वर्धने अधिकं ध्यानं न दत्तवती । परन्तु तस्याः प्रतिवेषी अधिकारी स्व-सस्यानाम् अत्यधिकां रक्षां करोति स्म । सः तेभ्यः बहु-जलम् अपाययत्। कीट-पशु-आदिभ्यः तेषां रक्षाम् अकरोत् च।

क्रमेण तानि उन्नतानि सञ्जातानि। परीक्षितायाः सस्यानि सामान्यानि आसन्। अधिकारिणः सस्यानि हरितानि दर्शनीयानि च। एकवारं रात्रौ अतिवृष्टिः जाता। अग्रिमे दिने उभौ स्वस्य सस्यानि द्रष्टुं बहिः उद्याने आगतवन्तौ। हरेः सर्वाणि अपि सस्यानि मूलतः नष्टानि। किन्तु परीक्षितायाः सस्यानि तथैव आसन्। तत्र एकम् अपि सस्यं न नष्टम्।

हरिः तद् दृष्ट्वा चकितः । सः पृष्टवान्, "आवां समानानि एव सस्यानि रोपितवन्तौ । प्रायः अहं तु तेषाम् अधिकां रक्षां करोमि स्म। दर्शनेऽपि मम सस्यानि सुन्दराणि आसन्। तर्हि कथं मम सस्यानि उन्मूलितानि ? भवत्याः कथं तथैव स्थितानि ?" परीक्षिता सस्मितम् उक्तवती – "भवान् भवद्भ्यः सस्येभ्यः अधिकं ध्यानं जलं च दत्तवान्। अतः तानि जलस्य कृते अधिकं श्रमं न कुर्वन्ति स्म। भवान् तत्सर्वं तेषां कृते सुकरं कृतवान्। तेनैव तानि मूलानि भूम्याः अन्तः जलार्थं न अगच्छन् स्वयं परिश्रमं न अकुर्वन्। अहं तेभ्यः किञ्चिदल्पं जलं दत्तवती। तस्माद् अधिकं जलं प्राप्तुं मूलानि अन्तः गतानि तैः परिश्रमः कृतः। अतः तानि भूम्यां सुदृढानि जातानि। अतः एव तानि न उन्मूलितानि।"

हरिः प्रत्युक्तान् "अहो ! मया सस्यानि बहु-पोषितानि । सर्वं च अतिसुगमं कृतं तेषां कृते । मम क्षतिः मया ज्ञाता। एतादृशेन व्यवहारेण एव ज्ञायते यद् भवती उत्तमा शिक्षिका अस्ति" इति।

## कृपया हसन्तु

गणितविषयात् त्रस्तः कश्चन छात्रः शिक्षकम् अपृच्छत् - "भोः आचार्य ! यदि शून्यस्य आविष्कारः आर्यभट्टेन कृतः इति सत्यं स्यात् तर्हि आर्यभट्टः तु कलियुगे जातः आसीत् । एवं चेत् तस्मात् पूर्वं शतकौरवाणां रावणस्य दशमस्तकानां च गणना केन कृता स्यात् ?" इति ।

छात्रस्य प्रश्नं श्रुत्वा विद्यालयात् अवकाशं स्वीकृत्य शिक्षकः अद्यापि उत्तरम् अन्वेष्टुं प्रयत्नं कुर्वन् अस्ति ।

★ ★ ★ ★ ★

न्यायाधीशः - (अपराधिनं प्रति) यदि असत्यं वदसि तर्हि किं प्राप्स्यसि इति जानासि किम् ?

अपराधी - आम् । नरकं प्राप्स्यामि ।

न्यायाधीशः - यदि सत्यं वदिष्यसि तर्हि.... ?

अपराधी - कारागारम् ।

★ ★ ★ ★ ★

यमदूतः यदा नमनं स्वीकर्तुम् अगच्छत् तदा नमनः बहुविलापम् अकरोत् । विलपन्तं नमनं दृष्ट्वा यमदूतः अवदत् - "किमर्थं रोदिषि ?" स्वर्गम् आगच्छ । तत्र सर्वं प्राप्स्यसि ।

नमनः - किं स्वर्गे सर्वं प्राप्यते ?

यमदूतः -आं सर्वम् ।

नमनः -धूमशलाकापि ?

यमदूतः -आम् । किन्तु धूमशलाकां ज्वालयितुं त्वया नर्कं प्रति गन्तव्यं भविष्यति ।

## प्रहेलिका

– संस्कृतविकिपिडीयाजालस्थानात्

**यदस्ति धपयोर्मध्ये तदस्ति तव सन्निधौ ।**
**तन्नास्ति मद्गृहे चैव तदर्थमहमागतः ॥**

वर्णमालायां ध–प इत्येतयोः अक्षरयोः मध्ये यदस्ति तत् भवतः समीपे विद्यते । किन्तु मम समीपे न विद्यते । तस्य प्राप्त्यर्थम् अहम् आगतः अस्मि ।

**उत्तरम्** – धनम्

**राघवस्य शरैघोरैः घोररावणमाहवे ।**
**अत्रक्रियापदं गुप्तं मर्यादा दशवार्षिकी ॥**

"राघवस्य घोरैः शरैः घोररावणम् आहवे" इति वाक्ये क्रियापदं गुप्तम् । यदि उत्तरं वदति तर्हि तस्य दशवर्षपर्यन्तं मर्यादा कल्प्यते ।

**उत्तरम्**–

हे राघव ! घोरैः शरैः रावणम् आहवे स्य इति पदच्छेदः करणीयः । स्य इति षो अन्तकर्मणि इति धातोः लोट् लकारे मध्यमपुरुषैकवचनम् । स्य इत्यस्य क्षयं कुरु (नाशय) इत्यर्थः ।

## ज्ञानसरिता

श्यामः पटेलः

### ''पर्यावरणाय उपयुक्तः तृणराजः वंशः''

वनस्पतयः वातावरणात् 'कार्बनडायोक्साइड' नामकं वायुं सङ्गृह्य 'ओक्सिजन' नामकं प्राणवायुं प्रदास्यन्ति। अनेन एते वनस्पतयः वायुमण्डलाय उपयोगिनः भवन्ति। एतेषु अपि तृणराजः वंशः वा वेणुः प्राणवायोः उत्पादने अत्युपयोगी वर्तते। वंशः सर्वेभ्यः वनस्पतिभ्यः ३० प्रतिशतं यावत् अधिकं प्राणवायुम् उत्पादयति। न केवलं पर्यावरणाय वंशः उपकारी, सम्पूर्णमानववंशाय अपि महोपकारी अस्ति।

वंशस्य वृद्धिः त्वरया भवति। तस्य उत्पादने नाधिकः श्रमः अपेक्षितः। वंशस्य वनानि अल्पीयसा कालेन विस्तरन्ति। यदा अन्यवनस्पतयः तेषां वयसः २० वर्षानन्तरं परिपक्वाः भवन्ति तदा वंशः तस्य जन्मनः एकवर्षात् पञ्चवर्षेषु एव प्रगल्भः भवति। वंशस्य मूलानि विशिष्टानि सन्ति। वंशस्य कर्तनं कृत्वाऽपि मूलेभ्यः पुनः वंशः जायते। अपरं कौतुकमस्ति यत् वंशाय उर्वरकस्य आवश्यकता न भवति। प्रत्युत तस्य पर्णानि भूमौ पतित्वा उर्वरकनिर्माणं कुर्वन्ति।

वर्षाजलेन जायमानं भूमेः निर्वहनं वंशः वारयति। वंशस्य सर्वेषु ऋतुषु वृद्धिः भवति। वंशः निर्मलायसतः अपि दृढतरः भवति, तस्य वंशस्थविलात्। वल्मीकः अपि वंशं न भक्षयति। वंशात् सञ्जातानाम् अङ्गाराणां प्रयोगः जलशुद्धये भवति। ते दग्धवंशखण्डाः वायुमण्डलात् दुर्गन्धं दूरीकुर्वन्ति। वंशनिर्मिता भित्तिः गृहे शैत्यं वर्धयति। एवं च बहुषु देशेषु जनाः मृदुलवंशात् विविधानि खाद्यानि पचन्ति।

वंशः – bamboo plant, उर्वरकम् – fertilizer, वंशस्थविलम् – hollow in bamboo,

निर्मलायसम् – stainless steel

## शब्दमञ्जूषा

| | | |
|---|---|---|
| हालिकः | हलवाला | a ploughman |
| हासः | हंसी | laughter |
| हिंस्रः | घातक | murderous |
| हिक्का | हिचकी | hiccup |
| हिङ्गु | हींग | asafoetida |
| हिन्दोलः | हिंडोला | a swing |
| हिम | ठंडा | cold |
| हिरण्यम् | सोना | gold |
| हिल्लोलः | लहर | a wave |
| हृद्यम् | हृदय को प्रिय | dear to heart |
| हृषीकम् | ज्ञानेन्द्रिय | an organ of senses |
| हृष्टः | प्रसन्न | pleased |
| हेमन् | सोना | gold |
| हेवाकः | तीव्र इच्छा | acute desire |
| हैमवत | बर्फीला | snowy |

## किं भवन्तः जानन्ति ?

**१ ) एतेषु का कृतिः बुद्धसम्बद्धा न वर्तते ?**

(क) बुद्धचरितम् (ख) पउचरिउ (ग) धम्मपद (घ) सुत्तपिटक

**२ ) एतेषु कः ग्रन्थः गुरुनानकदेवेन रचितः वर्तते ?**

(क) गीतगोविन्द (ख) वैराग्यशतकम् (ग) जपुजीसाहिब (घ) सत्तपिटक

**३ ) पार्वती-परिणयस्य कर्ता कः वर्तते ?**

(क) सोमभट्टः (ख) मुकुलभट्टः (ग) बाणभट्टः (घ) केशवः

**४ ) वेदाङ्ग-ज्योतिषस्य कर्ता कः वर्तते**

(क) लगधः (ख) आर्यभटः (ग) वराहमिहिरः (घ) सुश्रुतः

**५ ) रामचरितमानसस्य रचयिता कः वर्तते ?**

(क) वाल्मीकिः (ख) सोमदेवः (ग) तुलसीदासः (घ) जयदेवः

**६ ) 'मनुस्मृतिः' इति ग्रन्थस्य कर्ता कः वर्तते ?**

(क) वात्स्यायनः (ख) मनुः (ग) शङ्कराचार्यः (घ) क्षेमन्द्रः

**७ ) 'नैषधीयचरितम्' ग्रन्थस्य रचयिता कः वर्तते ?**

(क) श्रीहर्षः (ख) कालिदासः (ग) राजशेखरः (घ) वरदराजाचार्यः

उत्तराणि – (१) ख (२) ग (३) ग (४) क (५) ग (६) ख (७) क

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY

॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

Value Education Through Sanskrit in

## बालसंस्कारकेन्द्रम्

(Class 4 to 6)

## बालसंस्कृतकेन्द्रम्

(Class 7 & 8)

**Date :** 21/11/20 to 10/04/21
**Day :** Every Saturday
**Time :** 6:00 pm to 7:30 pm
**Fees :** 3000/-

➤ **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY

॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## मार्गदर्शनम्

## ( व्याकरणम् )

**Class 9, 10**

**Date :** 18/11/20 to 27/11/20
**Day :** Daily
**Time :** 4:00 pm to 5:30 pm
**Fees :** 2000/-

**Learn Online**

## संस्कृतभाषाशिक्षणम्

**First Level**

**Date :** 1/1/21 to 31/3/21
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm
**Fees :** 5000/-

**Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

## संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY

॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006